# दशकुमारचरिते पूर्वपीठिकायां प्रतिफलितो मानवतावादः

Dr. Basudeb Das
*PGT Sanskrit Teacher, Govt. of Bihar, Bihar, India*

शोधसारः- शब्दार्थयोः सहितयोः भावं साहित्यम्। उक्तञ्च काव्यमीमांसायाम्-

"शव्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या ।" इति ।

अर्थात् शब्देन सह अर्थेन सुसम्मेलनं साहित्यं कथ्यते। 'साहित्य' शव्दस्य प्रयोगो यद्यपि काव्यादीनां कृते भवति तथापि काव्यं केवलं मनोरञ्जनस्य साधनमात्रं न, अपि तु मानवसमाजस्य मूल्यबोधःकाव्यमाध्यमेन प्रतिफलितं भवति। काव्यं मानवं रसान्वितं कृत्वा आनन्दं ददाति, अपितु कान्तासम्मितोपदेशप्रदानेन जीवनं सुमार्गे प्रेरयति। काव्यप्रयोजनविषये आचार्यमम्मटेन उक्तम् -

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।" इति ।

संस्कृतसाहितस्य एकं प्रधानलक्ष्यम् उद्देश्यं वा मानवमात्रस्य हितसाधनं कल्याणविधानञ्च। मूलतः संस्कृतसाहित्ये विश्वबन्धुभावना सदैवदृश्यते। संस्कृतिः मानवजीवनस्य कला, व्यक्तित्वं च प्रकाशयति। अतः संस्कृतिं विना मानवस्य मानवीकरणम्,वर्वरतायाः शुद्धिकरणं वा न सम्भवति। अस्माकं संस्कृतेः सुप्रसिद्धवचनं - सत्यं-शिवं-सुन्दरम् इति। मुख्यतया मानवमूल्यानि त्रीणि- सत्यं सुन्दरं सौजन्यता सदाचारो वेति। भारतीयसंस्कृतेः परम्परायां वा सत्यं, सहयोगिता, अहिंसा, प्रेम, शान्तिः, श्रद्धापरायणता, सख्यता च मानवानां प्रकृतपरिचयरूपेण प्रतिपादितमस्ति। एतदतिरिक्तं क्षमा ,करुणा, त्यागः, आत्मनिर्भरता, वाक्-संयमः, एकाग्रता, आनुगत्यं, प्रकृतिप्रेम च विविधानि मानवमूल्यानि अपि विद्यन्ते।

भारतीयसंस्कृतेः संस्कृतसाहित्यस्य दिव्यानि शाश्वतानि मूल्यानि अनुसृत्य जनाः प्रतिष्ठिता भवन्ति स्म। अतः सर्वकाले तस्य महत्वं दृश्यते। एवमेव विलक्षणपरम्परायाः सार्थककविः आसीत् कविवरः आचार्यदण्डी। स प्रतिपदे तस्य रचनायां मानवतायाः विकाशे सचेष्टो भवति। तस्य रचनासु अन्यतमम् एव दशकुमारचरितम् इति गद्यकाव्यम्। अनेन साहित्यकीर्तिमाध्यमेन दण्डी परोपकारं, दयां, क्षमां, प्रभुभक्तिं, सख्यतां, इन्द्रियजयं, दानदाक्षिणादिकञ्च वर्णयति स्म। मम प्रबन्धे दण्डिनो दशकुमारचरितस्य पूर्वपीठिकायां प्रतिफलितस्य मानवतावादस्य आलोचना भविष्यति।

कूटशब्दाः- दण्डी, दशकुमारचरितम्, मानवतावादः, पूर्वपीठिका, राजहंसः चेति।

भूमिकाः- अस्यां पृथिव्यां मानवसभ्यतायाः प्रारम्भकालात् एव लब्धप्रसवं कविप्रतिभाया अमृतमयं फलं भवति साहित्यम्। शब्दार्थयोः सहितयोः भावं साहित्यम्। उक्तञ्च काव्यमीमांसायाम्-

"शव्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या ।" इति ।[1]

अर्थात् शब्देन सह अर्थेन सुसम्मेलनं साहित्यं कथ्यते। संस्कृतभाषायाः साहित्यं च अनवद्यं सर्वापेक्षाया अधिकं

[1] काव्यमीमांसा - 2.6

च। संस्कृतसाहित्यम् अतीव विस्तृतं व्यापकं समृद्धञ्च। 'साहित्य' शव्दस्य प्रयोगो यद्यपि काव्यादिनां कृते भवति तथापि काव्यं केवलं मनोरञ्जनस्य साधनमात्रं न, अपि तु मानवसमाजस्य मूल्यबोधं काव्यमाध्यमेन प्रतिफलितं भवति। काव्यं मानवं रसान्वितं कृत्वा आनन्दं ददाति, अपितु कान्तासम्मितोपदेशप्रदानेन जीवनं सुमार्गे प्रेरयति। साहित्यमेव भारतीयसंस्कृतेः मूलवाहकम्। तस्मात् संस्कृतसाहित्यमेव भारतीयाणां कृते संस्कृतेः प्रधानधारकं वाहकञ्च।

भारतीयशिक्षापरम्परायाः मानवतावाद एक अतीवो महान्गुणो वर्तते। सुप्राचीनकालादेव भारतीयसंस्कृतौ ऐतिह्ये शिक्षायाञ्च मानवतावादस्य प्रसारः प्रचलनं च दृश्यते। भारतीयसंस्कृतेः संस्कृतसाहित्यस्य दिव्यानि शाश्वतानि मूल्यानि अनुसृत्य जनाः प्रतिष्ठिता भवन्ति स्म। अतः सर्वकाले तस्य महत्वं दृश्यते। एवमेव विलक्षणपरम्परायाः सार्थककविः आसीत् कविवरः आचार्यदण्डी। स प्रतिपदे तस्य रचनायां मानवतायाः विकाशे सचेष्टो भवति। तस्य रचनासु अन्यतमम् एव "दशकुमारचरितम्" इति गद्यकाव्यम्। अनेन साहित्यकीर्तिमाध्यमेन दण्डी परोपकारं, दयां, धैर्यं, क्षमां, प्रभुभक्तिं, सख्यतां, इन्द्रियजयं, दानदाक्षिणादिकञ्च वर्णयति स्म। "दशकुमारचरिते पूर्वपीठिकायां प्रतिफलितो मानवतावादः" इति मम प्रबन्धे दण्डिनो दशकुमारचरिते पूर्वपीठिकायाः प्रतिफलितस्य मानवतावादस्य आलोचना वर्तते।

अस्मिन् जगति न किञ्चिदपि अविनश्वरमस्ति। कालो हि बलवत्तरः। अतो वयं कञ्चित् कालं मिलनसुखम् अनुभूय मृत्युवशात् अनन्तकालं वियोगं प्राप्नुमः। परं मानवानां कीर्तिः कदापि नाशं न गच्छति। मरणात् परमपि चिरकालं यावत् पृथिव्यां कीर्तिः तिष्ठति। दशकुमारचरितस्य पूर्वपीठिकायाः प्रथमोच्छ्वासे आदर्श- राज्ञः ये ये गुणाः भवेयुः मगधराजराजहंसमध्ये एते गुणाः यथार्थरूपेण आसन्। कस्यचित् देशस्य उन्नतेः मूलं भवति सुशासनम्। राजहंसस्यसुशासनेन तस्य राज्यमासीत् सुजलम्-सुफलम्-शस्यश्यामलम्, समृद्धिपूर्णम् च। राजहंसः स्वीयगुणमाध्यमेन निर्मलं यशः विस्तारयति यत् इन्द्रपुर्यां स्थिते उद्याने अप्सरापि सम्मानेन सह गीतमाध्यमेन तस्य गुणकीर्त्तनं करोति- "पुरन्दरपुराङ्गणवनविहरणपरायणतरुणगणिकागणजे गीयमानयातिमानया...."[2] इति।

शास्त्रे कथितम् -

"स जीवति गुणा यस्य यस्य धर्मः स जीवति।
गुणधर्मविहीनस्य जीवितं निष्प्रयोजनम्।।"[3] इति ।

एवं गुणमाध्यमेन राजहंसो मानवमन्दिरे चिरं विलसति। अतो मानवताया इयं शिक्षा अस्माकं जीवने अवश्यमेव ज्ञातव्यम्।

मानवतावादस्य विशेषगुणो भवति गुणिनं प्रति श्रद्धा प्रदर्शनम्, तेषां गुणान् प्रति सम्मानं प्रदर्शनम्च। एते गुणाः राजहंसेऽपि यथार्थरूपेण परिदृश्यन्ते। स प्रतिनियतं यज्ञानुष्ठानेन शास्त्रज्ञ-विद्वान्-यशस्वी ब्राह्मणान् च पालयति। उक्तञ्च- "अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भारभासुर-भूसुरनिकरः।"[4] इति। 'हितोपदेशः' इति कथाग्रन्थे उच्यते -

"इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः।"[5] इति ।

[2] द.कु.च. (सम्पा. प. शिवप्रसाद शर्मा), पूर्वपीठिका, प्रथमोच्छ्वास-2

[3] चा.नी.द.14/13

[4] द.कु.च., (सम्पा. प. शिवप्रसाद शर्मा), पूर्वपीठिका, प्रथमोच्छ्वास-2

[5] हितो.(सम्पा.सत्यनारायण चक्रवर्ती), मित्र., श्लोक-8, पृष्ठा-33

अर्थात् यज्ञ-अध्ययन-दान-तप-सत्यम्-क्षमा-अलोभाः चेति धर्मस्य अष्टविधाः मार्गाः स्मृताः।

वैचित्यपूर्णम् इदं जीवनं सुखदुःखेन आवर्तितं भवति। अस्मिन् जीवने सर्वं क्षणस्थायी, अद्य यः राजा, श्वः दीनोऽपि भविष्यति- मूल्यबोधस्य इयं शिक्षा दशकुमारचरिते आचार्यदण्डिना सुन्दररूपेण उपस्थाप्यते। कालचक्रस्य, दैवस्य अधीनं च अस्माकं जीवनम्, तद् राजहंसं व्याख्यायति तस्य मन्त्रिणः। राजहंसः भूपालकुलेषु तेजसा गरिष्ठ आसीत्। परन्तु अद्य विन्ध्यपर्वतारण्ये निवसति। यदा प्रतिकूलमितिभाग्योराजहंसेण धिक्कृतः तदा तस्य मन्त्रिभिः उच्यते यद्यपि देव सम्पूर्णस्य राजसमूहस्य मध्ये तेजोवरिष्ठो गरिष्ठो च तथापि अद्य अरण्यवासी। यतो हि जलस्य बुद्बुदैः समाना सम्पद्, विद्युत् इव सहसा उदेति, नश्यति च। तस्मात् कारणात् सर्वं द्रव्यं भाग्याधीनम् एव।उच्यते -

"आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः।
लक्षीस्तयोतरङ्गभङ्गचपला विद्युच्चलं जावितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ।।"[6]
इति ।

दण्डिना उच्यते- "देव! सकलस्य भूपालकूलस्य मध्ये तेजोवरिष्ठो गरिष्ठो भवानद्य विन्ध्यवनमध्यं निवसतीति जलबुद्बुदसमाना विराजमाना संपत्तडिल्लतेव सहसैवोदेति नश्यति च। तन्निखिलं दैवायत्तमेवावधार्य कार्यम्।" [7]इति। कादम्वर्य्यां शुकनासोपदेशे अपि लक्ष्म्याश्चरित्रिं तरङ्गबुद्वदवत् चञ्चलमिति तुलितं कविना। बाणभट्टेन उच्यते- "गङ्गेव वसुजनन्यपि तरदुबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधिसंक्रान्तिः। पातालगुहेव तमोवहुला।"[8] इति। यदि भाग्ये दुःखं स्थास्यति तर्हि दैवम् अपि तत् परिवर्तयितुं न पारयति।

अतः मन्त्रिणः राजानं प्रति उपदिशन्ति भाग्याधीनं मत्वा सुसमयस्य अपेक्षां कुरु। दुःखान्तरं सुखमवश्यमेवागच्छतीति जागतिक नियमः। तथोक्तं महाकविभासेन-

"चक्रारपङक्तिरिव गच्छति भाग्यपङक्तिः।"
[9]इति ।

मन्त्रिणः राजहंसम् इत्थम् उपदिशन्ति- भवतः जीवने केवलं विपत्ति इति न। इतिहासे बहवः राजानः सन्ति ये तावत् विपदग्रस्ताः सन्त जर्जरिता कालकवलिता बभूवुः। सिंहासनारोहणसमये ते आत्मानम् इन्द्रेण सह तुलयन्ति परन्तु विपत्तौ असहायम् अनुभवन्ति। उदाहरणं यथा- इक्ष्वाकुवंशीयः राजा हरिश्चन्द्रः। हरिश्चन्द्रस्य भाग्ये ईदृशः समयः समागतः स राज्यं, पत्नीं, पुत्रं च परित्यज्य श्मशाने शवदाहकार्यं कृतवान्। यदा तस्य पुत्रस्य सर्पाघाते मृत्युः भवति पुत्रस्य शवदाहार्थं पत्न्याः सकाशात् कर्तव्यानुरोधात् रूपकाणि याचते। अहो! विडम्वना भाग्यस्य। कियत् दिनात् पूर्वे यः सम्राट आसीत् इतानीं स शवदाहकार्यं करोति। एषा भवति नियतिः। रामश्चन्द्रस्य अपि उदाहरणं वयं जानीमः। सिंहासने उपवेष्टुं गन्तुकामस्य रामश्चन्द्रस्य दुभाग्यवशात् वनगमनं भवति। तुलितल्पनिभे सज्जायां यः शेते इदानीम् उन्मुक्तपदभ्यां कण्टकाकीर्णवने निवसति स्म। इतोऽपि दुःखं किं भवितुम् अर्हति? न केवलम् एतद् दुःखं तस्य भार्याम् अपि रावणः अपहृतवान्। पितृवियोगजनितदुःखं, भार्यापहृतजनितदुःखं सर्वं स्वीकृतवान् रामश्चन्द्रः। परन्तु धैर्येण सह विपदः सन्मुखीनम् अभवत् स। धैर्य्यच्युतः न भवितव्यः। अतो भवान् अपि धैर्यधारणं कृत्वा सुसमयस्य अपेक्षां करोतु। यतो हि सज्जनाः सच्चरित्राः विपत्तौ दुःखिता विलासे मदमत्ताः न भवन्ति। उभयत्र तेषां एकरूपता एव दृश्यते। अतः उच्यते शास्त्रे-

[6] स्तोत्ररत्नावली, शिवापराधक्षमापनस्त्रोम्-13

[7] द.कु.च. (सम्पा. प. शिवप्रसाद शर्मा), पूर्वपीठिका, प्रथमोच्छ्वास-44

[8] काद.(शुक.), मूलः -17

[9]स्वप्न., श्लोक-1/4

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता
।।"[10]इति ।

अतः अमात्यस्य एते उपदेशो नित्यः शाश्वतश्च। सर्वसमये सर्वकाले कालोपयोगी एतद्विषये नास्ति कोऽपि संशयः।

पाप-पुण्यस्य विचारः कर्मफलानुसारेण मरणात् पश्चात् शास्तिविधानं तद् द्वितीयोच्छ्वासे दृश्यते। किरातेन हत मातङ्गः। अथ यमदूतैः सह मातङ्गो यमपुरीम् अगच्छत्। मातङ्ग एतावत् पर्यन्तं पापकार्ये युक्तमासीत् परन्तु मृत्योः पूर्वं स ब्राह्मणं रक्षितुं स्वजीवनं त्यक्तवान्। पुण्यकर्मवशात् मातङ्गः स्वजीवनं पुनः प्राप्तवान्। तस्य पापं नष्यति। पुण्यकर्मकरणे तस्य प्रीतिरुदेति। पूर्वशरीरप्राप्तेः प्राग् चित्रगुप्तः मातङ्गं नरकस्य तीव्रवेदनाविशेषं दर्शयति। तत्र मातङ्गेन नरकस्य भयावहपरिणतिं दृष्टववान् - " .................. तत्र तत्र सतप्तेष्वायसस्तम्भेषु बध्यमानान्, अत्युष्णीकृते विततशरावे तैले निक्षिप्यमाणान्, लगुडैर्जर्जरीकृतावयवान्, निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत्।" [11]इति। अतः पापपुण्यवशात् मानवाः मरणात् अनन्तरं कर्मफलानि भोगं कुर्वन्ति। सम्पूर्णजीवने पापासक्तो नरः नरकस्य तीव्रयातनां भुङ्क्ते। पुनो यः पुण्यकर्म करोति स चिरसुखं लभते। जीवनान्ते पुण्यकर्मवशात् मातङ्गः पूर्णजीवनं प्राप्नोति। अतः अस्माकं सदा पापपुण्यं विचार्य्य कर्म करणीयम् इति विवेकः।

मानवतावादस्य एको महान् गुणो भवति कृतज्ञताबोधः। यः अस्मिन् उच्छ्वासे यथार्थरूपेण प्रतिफतलितः भवति। ब्राह्मणं रक्षार्थं मातङ्गो स्वयं मृत्यं वरयति। यद्यपि पुण्यवशात् स पुनर्जीवनं प्राप्तवान्। ब्राह्मणः तस्य कृतज्ञतारूपेण तत्र स्थित्वा तस्य जीवनरक्षार्थं शीतलोपचारादिकर्म कृतवान्। यदा मातङ्गः सम्पूर्णरूपेण सुस्थो भवति तदा ब्राह्मणः कृतज्ञवशात् मातङ्गाय अक्षरशिक्षाम्, शास्त्रज्ञानम्, पापनाशस्य कारणं चोपदिशति। उक्तञ्च - "........................... द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां बिधाय विविधागमतन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणगम्यमानस्य शशिखण्डशेखरस्य पूजाविधानमभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात्।"[12] इति।

कृतज्ञताबोधस्य दृष्टान्तो मातङ्गचरित्रेऽपि दृश्यते। राजवाहनो मातङ्गम् अभिष्टसिद्धौ साहाय्यं कृतवान्। ततः मातङ्गः कृतज्ञताज्ञापनाय स्वपत्न्याः क्षुत्पिपासादिक्लेशनाशनमणिं राजवाहनाय दत्तवान्। अतः मातङ्गस्य कृतज्ञताबोधस्य अयं दृष्टान्तः अतीव प्रशंसनीयः। उपर्युक्तया पर्यालोचनया इदमेव भाषितं यत् दण्डी आसीत् मानवतावादस्य सार्थकपूजारी।

[10] द.कु.च. (सम्पा.एच.एन.यादव), पूर्वपीठिका, प्रथमोच्छ्वास-34, विशेषः, पृष्ठा- 69

[11]द.कु.च., (सम्पा. प. शिवप्रसाद शर्मा), पूर्वपीठिका, द्वितीयोच्छ्वास-9

[12]द.कु.च (सम्पा. प. शिवप्रसाद शर्मा), पूर्वपीठिका, द्वितीयोच्छ्वास-10

उपसंहारः- स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। सा तु विलुप्ता। इदानीं मानवतायाः भारतीयतायाश्च समुत्पादनं, तत्र च जीवनशक्तेः सञ्चारणमपेक्षते। एतदर्थमस्माकं यत् संस्कृतसाहित्यं वर्तते, तत्र विद्यमानानि मानवताधायकानि वचनानि आधृत्य प्रचारः कर्तव्यः। समकालीनसमाजस्य सङ्कटपूर्णव्याधितः परित्राणाय मानवता पुनर्प्रतिष्ठापनाय च दशकुमारचरिते प्रतिफलितो मानवतावादः इदानीमेकविंशताब्द्यां विज्ञानस्य प्रयुक्तिविद्यायाश्च युगेऽपि नाप्रासङ्गिकमिति विदुषां निश्चिति इति शम्।

ग्रन्थसन्दर्भसूची

दण्डिनः *दशकुमारचरितम्* - सम्पा. एच.एन.यादवः, हरीशविश्वविद्यालयप्रकाशनम्, आगरा, नवीनसंस्करणम्, वि.सं. 2063
दण्डिनः *दशकुमारचरितम्* - सम्पा. नारायणबालकृष्णगोडबोले, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 2013
दण्डिनः *दशकुमारचरितम्* - सम्पा. शिवप्रसादशर्मा, चौखम्बाकृष्णदासअकादमी, वाराणसी, प्रथमसंस्करणम्, 2014
बाणभट्टस्य *कादम्बरी (शुकनासोपदेशः)*- सम्पा. अमलकुमारभट्टाचार्य्यः, संस्कृतबुकडिपो, 2020
चाणक्यस्य चाणक्यनीतिदर्पणः(राजनीतिसमुच्चयः)- सम्पा. गुञ्जेश्वरचौधरी, चौखम्बासुरभारती- प्रकाशनम्, 2016
नारायणशर्मणः *हितोपदेशः* - सम्पा. सत्यनारायणचक्रवर्ती, संस्कृतपुस्तकभाण्डार, कलकाता, चतुर्थ संस्करणम्, 2012
भासस्य *स्वप्नवासवदत्तम्*- सम्पा. अनिलचन्द्रवसुः, संस्कृतबुकडिपो, कलकाता, 2009
राजशेखरस्य *काव्यमीमांसा* - सम्पा. सीतानाथआचार्यशास्त्री, सदेशः, द्वितीयप्रकाशम्, 2012